सपरिवाराय श्रीरामाय नमः- मध्वभिषेकांते पुनः क्षीराभिषेकं समर्पयामि।
नदी-नद-समुद्रादि-तोयैर्-मंत्राभिसंस्कृतैः।
पट्टाभिषिक्त राजेंद्र स्नाहि शुद्ध-जलेन मे॥
सपरिवाराय श्रीरामाय नमः- शुद्धोदक-स्नानं समर्पयामि।
स्नानोत्तरम् आचमनीयं समर्पयामि।
हित्वा पीतांबरं चीर-कृष्णाजिन-धराच्युत।
परिधत्स्वाद्य मे वस्त्रं स्वर्ण-सूत्र-विनिर्मितम्॥
सपरिवाराय श्रीरामाय नमः- वस्त्रं समर्पयामि।
राजर्षि-वंश-तिलक रामचंद्र नमोऽस्तु ते।
यज्ञोपवीतं विधिना निर्मितं धत्स्व मे प्रभो॥
सपरिवाराय श्रीरामाय नमः- उपवीतं समर्पयामि।
किरीटादीनि राजेंद्र हंसकांतानि राघव।
विभूषणानि धृत्वाऽद्य शोभस्व सह सीतया॥
सपरिवाराय श्रीरामाय नमः- आभरणम् समर्पयामि।
संध्या-समान-रुचिना नीलाभ्र-सम-विग्रह।
लिंपामि तेऽंगकं राम चंदनेन मुदा हृदि॥
सपरिवाराय श्रीरामाय नमः- गंधान् धारयामि।
गंधस्योपरि हरिद्रा-कुंकुमं समर्पयमि।
अक्षतान् कुंकुमोन्मिश्रान् अक्षय्य-फल-दायक।
अर्पये तव पादाब्जे शालि-तंडुल-संभवान्॥
सपरिवाराय श्रीरामाय नमः- अक्षतान् समर्पयामि।
चंपकाशोक-पुन्नागैर्-जलजैस्-तुलसी-दलैः।
पूजयामि रघूत्तंस पूज्यं त्वां सनकादिभिः॥
सपरिवाराय श्रीरामाय नमः- पुष्पाणि समर्पयामि।

दंडकारण्य-संचारिणे नमः ३०
विराध-स्वर्ग-दायकाय नमः
रक्षः-कालांतकाय नमः
सर्व-मुनि-संघ-मुदावहाय नमः
प्रतिज्ञात-आशर-वधाय नमः
शरभंग-गति-प्रदाय नमः
अगस्त्यार्पित-बाणास-खड्ग-तूणीर-मंडिताय नमः
प्राप्त-पंचवटी-वासाय नमः
गृध्रराज-सहायवते नमः
कामि-शूर्पणखा-कर्ण-नास-च्छेद-नियामकाय नमः
खरादि-राक्षस-त्रातखंडनावितसज्जनाय नमः ४०
सीता-संश्लिष्ट-कायाभा-जित-विद्युद्-युतांबुदाय नमः
मारीच-हंत्रे नमः
मायाढ्याय नमः
जटायुर्-मोक्ष-दायकाय नमः
कबंध-बाहु-लवनाय नमः
शबरी-प्रार्थितातिथये नमः
हनुमद्-वंदित-पदाय नमः
सुग्रीव-सुहृदेऽव्ययाय नमः
दैत्य-कंकाल-विक्षेपिणे नमः
सप्त-साल-प्रभेदकाय नमः ५०
एकेषु-हत-वालिने नमः
तारा-संस्तुत-सद्गुणाय नमः
कपींद्री-कृत-सुग्रीवाय नमः
सर्व-वानर-पूजिताय नमः
वायु-सूनु-समानीत-सीता-संदेश-नंदिताय नमः
जैत्र-यात्रोद्यताय नमः
जिष्णवे नमः
विष्णु-रूपाय नमः
निराकृतये नमः
कंपितांभोनिधये नमः ६०
संपत्-प्रदाय नमः
सेतु-निबंधनाय नमः
लंका-विभेदन-पटवे नमः
निशाचर-विनाशकाय नमः
कुंभकर्णाख्य-कुंभींद्र-मृगराज-पराक्रमाय नमः
मेघनाद-वधोद्युक्त-लक्ष्मणास्त्र-बलप्रदाय नमः
दशग्रीवांधतामिस्त्र-प्रमापण-प्रभाकराय नमः
इंद्रादि-देवता-स्तुत्याय नमः
चंद्राभ-मुख-मंडलाय नमः
विभीषणार्पित-निशाचर-राज्याय नमः ७०
वृष-प्रियाय नमः
वैश्वानर-स्तुत-गुणावनिपुत्री-समागताय नमः
पुष्पक-स्थान-सुभगाय नमः
पुण्यवत्-प्राप्य-दर्शनाय नमः
राज्याभिषिक्ताय नमः

